# Shri Bala Bhujanga Stotram

# શ્રીબાલાભુજઙ્ગસ્તોત્રમ્

## Document Information

Text title : Shri Bala Bhujanga Stotram

File name : bAlAbhujangastotram.itx

Category : devii, dashamahAvidyA, devI, bhujanga

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલાભુજઙ્ગસ્તોત્રમ્

શ્રીનીલલોહિત ઉવાચ-
જગદ્યોનિરૂપાં સુવેશીં ચ રક્તાં ગુણાતીતસંજ્ઞાં મહાગુહ્યગુહ્યામ્ ।
મહાસર્પભૂષાં ભવેશાદિપૂજ્યાં મહાત્યુગ્રબાલાં ભજેઽહં હિ નિત્યામ્ ॥ ૧॥

મહાસ્વર્ણવર્ણાં શિવપૃષ્ઠસંસ્થાં મહામુણ્ડમાલાં ગલે શોભમાનામ્ ।
મહાચર્મવસ્ત્રાં મહાશઙ્ખઃહસ્તાં મહાત્યુગ્રબાલાં
ભજેઽહં હિ નિત્યામ્ ॥ ૨॥

સદા સુપ્રસન્નાં ભૃતાસૂક્ષ્મસૂક્ષ્માં વરાભીતિહસ્તાં ધૃતાવક્ષપુસ્તામ્ ।
મહાકિન્નરેશીં ભગાકારવિદ્યાં મહાટ્યુગ્રબાલાં ભજેઽહં હિ નિત્યામ્ ॥ ૩॥

તિનીં તીકિનીનાં રવાં કિઙ્કિઃણીનાં હહાહા હહાહા મહાલાપશબ્દામ્ ।
તથૈથૈ તથૈથૈ મહાનૃત્યનૃત્યાં મહાટ્યુગ્રબાલાં
ભજેઽહં હિ નિત્યામ્ ॥ ૪॥

નનાના રિરીરી મહાગીશ શમ્બૂ હુહૂવૂ હુહૂવૂ પશો રક્તપાનામ્ ।
ધિમિન્ધીં ધિમિન્ધીં મૃદઙ્ગસ્ય શબ્દાં મહાત્યુગ્રબાલાં
ભજેઽહં હિ નિત્યામ્ ॥ ૫॥

મહાચક્રસંસ્થાં ત્રિમાત્રાસ્વરૂપાં શિવાર્ધાઙ્ગભૂતાં મહાપુષ્પમાલામ્ ।
મહાદુઃખહર્ત્રીં મહાપ્રેતસંસ્થાં મહાત્યુગ્રબાલાં
ભજેઽહં હિ નિત્યામ્ ॥ ૬॥

સ્ફુરત્પદ્મવક્ત્રાં હિમાંશોઃ કલાપાં મહાકોમલાઙ્ગીં સુરેશેન માન્યામ્ ।
જગત્પાલનૈકાગ્રચિત્તાં સુપુષ્ટાં મહાત્યુગ્રબાલાં ભજેઽહં હિ નિત્યામ્ ॥ ૭॥

મહાદૈત્યનાશીં સુરાન્નિત્યપાલીં મહાબુદ્ધિરાશિં કવીનાં મુખસ્થામ્ ।
જટીનાં હૃદિસ્થાં મનૂનાં શિરઃસ્થાં મહાત્યુગ્રબાલાં
ભજેઽહં હિ નિત્યામ્ ॥ ૮॥

ભુજઙ્ગાખ્યં મહાસ્તોત્રં ત્રિષુ લોકેષુ દુર્લભમ્ ।

મહાસિદ્ધિપ્રદં દિવ્યં ચતુર્વર્ગફલપ્રદમ્ ॥ ૯॥

સર્વક્રતુફલં ભદ્રે સર્વવ્રતફલં તથા ।
સર્વદાનોદ્ભવં પુણ્યં લભતે નાત્ર સંશયઃ ॥ ૧૦॥

વિવાદે કલહે ઘોરે મહાદુઃખે પરાજયે ।
ગ્રહદોષે મહારોગે પઠેત્સ્તોત્રં વિચક્ષણઃ ॥ ૧૧॥

સર્વદોષા વિનશ્યન્તિ લભતે વાઞ્છિતં ફલમ્ ।
દૂતીયાગે પઠેદ્દેવિ સર્વશત્રુક્ષયો ભવત્ ॥ ૧૨॥

મહાચક્રે પઠેદ્દેવિ લભતે પરમં પદમ્ ।
પૂજાન્તે પઠતે ભક્ત્યા મહાબલિફલપ્રદમ્ ॥ ૧૩॥

પિતૃગેહે તુર્યપથે શૂન્યાગારે શિવાલયે ।
બિલ્વમૂલે ચૈકવૃક્ષે રતૌ મધુસમાગમે ॥ ૧૪॥

પઠેત્સ્તોત્રં મહેશાનિ જીવન્મુક્તસ્સ ઉચ્યતે ।
ત્રિકાલં પઠતે નિત્યં દેવીપુત્રત્વમાપ્નુયાત્ ॥ ૧૫॥

ઇતિ શ્રીકાલાનલતન્ત્રતઃ શ્રીબાલાભુજઙ્ગસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Bala Bhujanga Stotram*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*